शाचामपोति चेति” सि॰कौ॰का॰। “अपत्यैरिव नीवारभागधेयोचितैर्मृगैरिति” रघुः। “सोऽपत्यं स्नातुरुत्पाद्येति” “अपत्यलाभात् या तु स्त्रीति, “अपत्यं धर्मशुश्रूषेति” च मनुः।

**अपत्यदा** स्त्री॰ अपत्यं तद्धेतुं गर्भं ददाति। सेवनेन गर्भदायके ओषधिविशेषे गर्भदायिविद्यादौ च। अपत्यदायिमात्रे मन्त्रादौ त्रि॰।

**अपत्यपथ** पु॰ अपत्यस्य गर्भात् तन्निसारणस्य तदुत्पत्तेश्च पन्थाः अच् समा॰। पुत्रनिःसारणद्वारे स्त्रीणां गुह्यस्थानभेदे “स यदा विगुणानिलपीड़ोऽपत्यपथमनेकधा-प्रतिपद्यते इति” स्त्रीणान्तु विंशतिरधिका, दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः। अपत्यपथे चतस्र इति”। “तिर्य्यगागतस्य परिघस्येव तिरश्चीनस्य पार्श्वादूर्द्धमूर्द्धमुत्क्षिप्य गर्भमपत्यपथं प्रत्यार्ज्जवमानीयापहरेत् पार्श्वापवृत्तशिरसमसंप्रपीड्य ऊर्द्धमुत्क्षिप्य शिरोऽपत्यपथमानीयापहरेदिति” च सुश्रुतः।

**अपत्यशत्रु** स्त्री अपत्यं शत्रुर्गर्भभेदनेन नाशकं यस्याः। कर्कट्याम् सा हि गर्भेऽपत्यजनने तन्निःसारणसमये गर्भस्फोटनान्म्रियते इति” लोकप्रसिद्धेः “स्वनाशाय कर्कटी गर्भं धत्ते इत्युक्तेश्च तथात्वम्! द्वैत॰। अपत्यनाशके, कर्कटे सर्पे च।

**अपत्यसाच्** पुंस्त्री॰ अपत्यैः सचते संबध्यते सच—वेदे—ण्वि। अपत्यसमवेते। “अपत्यसाचं श्रुत्यं रराथाम्” ऋ॰ १, ११७,२२।

**अपत्र** पु॰ नास्ति पत्रं दलं पक्षोवास्य। वंशकरीरे (कोड़) अङ्कुरे च तदवस्थायां तयोः पत्रशून्यतयोत्पत्तेस्तथात्वम्। गलितपत्रे वृक्षे, गलितपक्षे विहगे च।

**अपत्रप** त्रि॰ अपगता त्रपा लज्जा यस्मात् प्रा॰ब॰ वा गतलोपः। लज्जाहीने लोपाभावे अपगतत्रपोऽप्युक्तार्थे।

**अपत्रपा** स्त्री अपरम् अपेक्ष्य त्रपा, अप+त्रप—भावे स्त्रियाम् अ वा। अन्यहेतुकलज्जायाम् लज्जामात्रे च। “अपत्रपा चेतसि च न्यषेधदिति” नैषधम्। [लज्जाशीले।

**अपत्रपिष्णु** त्रि॰ अप+त्रप—शीलार्थे इष्णुच्। स्वभावतो

**अपथ** न॰ न पन्थाः अप्राशस्त्ये न०त॰। “अपथं” पु॰न॰ पा॰। “विभाषेति” पा॰ वा अच् समा॰। अपकृष्टपथे निन्दितपथे कुपथे। “घनागमे राजपथे हि पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते” इति नै॰। “को वा न पदमपथेऽकार्य्यत मया” इति प्रबोध॰। “अथैतदपथमिवैति यदेतांदिशमिति” शत॰ब्रा॰। नास्ति पन्थाः सुन्दरमार्गो यत्र ब॰ अच् समा॰। सुन्दरपथशून्ये ग्रामादौ त्रि॰। पथोऽभावः अव्ययी॰ अच् समा॰। मार्गाभावे अव्य॰।

**अपथिन्** पु॰ न पन्थाः अप्राशस्त्ये न॰त॰ वा अजभावः। अपकृष्टपथे।

**अपथ्य** न॰ पथ्ये वैद्यकोक्तभोजनादिनियमाय नीत्युक्ताचाराय वा हितम् यत् न॰त॰। वैद्यकोक्तिसुल्लङ्घ्य, अनिष्टे भोजनादौ अहिताचारे च “अकार्य्यं कार्य्यसङ्काशमपथ्यं पथ्यमस्मेतम्” रामा॰। “संतापयन्ति किमपथ्यभुजं न रोगा” इति वै॰। पथ्यापथ्ये च सुश्रुते दर्शिते यथा “अथातो हिताहितीयमध्यायं व्याख्यास्यामः। यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यनेन हेतुना न किञ्चिद्द्रव्यमेकान्तेन हितमहितं वास्तीति” केचिदाचार्य्या ब्रुवते तत्तु न सम्यक्। इह खलु यस्माद् द्रव्याणि स्वभावतः संयोगतश्चैकान्तहितान्येकान्ताहितानि हिताहितानि च भवन्ति। तत्रैकान्तहितानि जातिसात्म्यात् सलिलघृतदुग्धौदनप्रभृतीनि। एकान्ताहितानि दहनपचनमारणादिषु प्रवृत्तान्यग्निक्षारविषादीनि। संयोगादपराणि विषतुल्यानि भवन्ति। हिताऽहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमित्यतः सर्व्वप्राणिनामयमाहारार्थं वर्ग उपदिश्यते। तद्यथा रक्तशालिषष्टिककङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकाशनकपुष्पककर्दमकशकुनाहृतसुगन्धककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः। एणहरिणकुरङ्गमृगमातृकाश्वदंष्ट्राकरालक्रकरकपोतलावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकादीनां मांसानि। मुद्गवनमुद्गमकुष्ठकलायमसूरमङ्गल्यचणकहरेणुआढकीसतीनाः। चिल्लीवास्तूकसुनिषण्णकजीवन्तीतण्डुलीयकमण्डूकपर्ण्यः। गव्यं घृतं सैन्धवदाड़िमामलकमित्येष वर्गः सर्वप्राणिनां सामान्यतः पथ्यतमः। तथा ब्रह्मचर्य्या-निवातशयनोष्णोदकनिशास्वप्नव्यायामाश्चैकान्ततः पथ्यतमाः। एकान्तहितान्येकान्ताहितानि प्रागुपदिष्टानि॥ हिताहितानि तु यद्वायोः पथ्यं तत्पित्तस्यापथ्यमिति॥ संयोगतस्त्वपराणि विषतुल्यानि भवन्ति। तद्यथा। वल्लीफलकवककरीराम्लफललवणकुलत्थपिण्याकदधितैलविरोहिपिष्टशुष्कशाकाजाविकमांसमद्यजाम्बवचिलिचिममत्स्यगोधावराहांश्च नैकध्यमश्नीयात् पयसा।

रोगं सात्म्यञ्च देशञ्च कालं देहञ्च बुद्धिमान्। अवेक्ष्याग्न्यादिकान् भावान् रोगवृत्तेः प्रयोजयेत्। अवस्थान्तर-